BAOU Education for All

Dr. Babasaheb Ambedkar Open University
(Established by Government of Gujarat)

NAAC ACCREDITED A++ GRADE 3.55/4

Accorded with CATEGORY 1 UNIVERSITY GRADED AUTONOMY by UGC

Open University Category 3rd Rank nirf 2024

Accorded with 12(B) status by UGC

## ‘गार्गी’ महिलासर्वाङ्गीनविकासकेन्द्रस्य डॉ. बाबासाहेब आम्बेडकर मुक्तविश्वविद्यालयस्य

# नारीकेन्द्रितः संशोधनलेखः

- **प्रस्तावना -**

डॉ. बाबासाहेब आम्बेडकर मुक्तविश्वविद्यालये “ गार्गी”- महिलासर्वाङ्गीनविकासकेन्द्रं २०१९ वर्षतः कार्यं कुर्वदस्ति। तच्च बालिकाशिक्षा, आत्मनिर्भरमहिला, महिलासुरक्षा, महिलानामुत्थानं, महिलानां सहभागिता चेति विषयेषु ध्यानं दत्त्वा महिलानां समग्रविकासाय च कार्यं करोति । अत्र विभिन्नस्तराणां महिलाः सफलतायाः यात्रायाः आरम्भार्थं प्रोत्साहिताः भवन्ति । समाजस्य विभिन्नवर्गाणां विभिन्नवयसां च महिलाः यथा यौनकार्यकर्त्र्यः, क्लीबाः, शारीरिकरूपेण विकलाङ्ग महिलाः, विधवाः, आदिवासिन्यः, ग्रामीणाः, नगरीयाः च महिलाः अनेन केन्द्रेण सह सम्बद्धाः भूत्वा स्वजीवने सकारात्मकं परिवर्तनं दृष्टवत्यः।

डॉ. बाबासाहेब आम्बेडकर मुक्तविश्वविद्यालयः "गार्गी" – महिलासर्वाङ्गीनविकासकेन्द्रस्य तत्त्वावधाने महिलाप्रधानसंशोधनार्थं महिलासंशोधकान् आमन्त्रयति। अधोलिखितविषयेषु भवतः शोधलेखानां स्वागतम्।

- **शोधलेखविषयः -**
- भारतीयचिन्तने स्त्रियः
- स्थानीयमहिलानां समस्याः समाधानानि च
- भारतस्य विकासे महिलानां भूमिका
- **पात्रता -** विविधक्षेत्रेषु कार्यं कुर्वतीनां महिलानां कृते शोधलेखार्थं समानः अवसरः अस्ति। छात्राः, शोधक्षेत्रे कार्यरताः महिलाः, शिक्षाक्षेत्रे, महिलाविकासक्षेत्रे च कार्यरताः महिलाः सादरम् आमन्त्रिताः सन्ति।
- **भाषा सामग्री च :** उपर्युक्तविषये गुजराती, हिन्दी, आङ्ग्लभाषायां वा संस्कृतभाषायां वा शोधपत्रं लेखितुं शक्नुथ। शोधलेखः ३००० तः ३५०० शब्दपर्यन्तं भवेत्। तस्य सारः १५० तः २०० शब्दपर्यन्तं भवेत् । फ़ॉन्ट आकारः शीर्षके (बोल्ड्) १४, उपशीर्षकेषु वा पाण्डुलिपिषु १२, MS Word, Arial Unicode MS (Sanskrit)
- **समीक्षा प्रकाशनं च** – भवता प्रेषितस्य शोधलेखस्य समीक्षा अनुभविभिः विशेषज्ञैः/विद्वद्भिः करिष्यते तथा च समीक्षासमित्या चितस्य शोधलेखस्य प्रकाशनं डॉ. बाबासाहेब आम्बेडकर मुक्तविश्वविद्यालयेन सम्पादिते पुस्तके भविष्यति तथा च चितशोधलेखस्य लेखकाय प्रकाशितपुस्तकस्य प्रतिलिपिः निःशुल्कं दास्यते प्रतीकात्मकपुरस्कारः च प्रदास्यते।
- **अन्तिमतिथिः** - उपर्युक्तविषये भवता लिखितं शोधपत्रं email id- gargi.research@baou.edu.in इत्यत्र दि. 31/12/2024 पर्यन्तं प्रेषितव्यम्। कृपया ज्ञातव्यं यत् अन्तिमतिथितः परं प्राप्ताः शोधलेखाः स्वीकृताः न भविष्यन्ति।
- **महत्त्वपूर्णटिप्पणी** - शोधपत्रं मौलिकं प्रामाणिकं च भवेत्। लेखे कस्यापि प्रकारस्य साहित्यिकं चौर्यं न स्वीकरिष्यते।

**धन्यवादाः ।**